संस्कृत-वार्ता:

10.04.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- प्रधानमंत्री भारतीय जनता पार्टीति दलस्य वरिष्ठ: नेता नरेन्द्र मोदी अवदत् यत् भारतम् अद्य विश्वे शक्ति रूपेण समुदेति। अत्र हि तमिलनाडो: महती भूमिका अस्ति।
- राष्ट्रपति: द्रौपदी मुर्मू: उक्तवती यत् होम्योपैथी चिकित्सा पद्धते: लोकप्रियताया: संवर्धनाय अनुसंधानं कार्यदक्षता च अतितरां महत्वपूर्णे स्त:। अपि च, होम्योपैथी इत्यस्या: प्रभावं प्रमाणयितुं चिकित्सानुसन्धानस्य वर्धनं परमम् आवश्यकम् अस्ति।
- राज्यसभाया: दशभि: नवनिर्वाचितै: सदस्यै: शपथवचनं स्वीकृतम्।
- ईद-उल-फित्र पर्व अद्य सम्पूर्णे जम्मू-कश्मीरे धार्मिक-श्रद्धया: हर्षोल्लासेन च सह आमान्यते।
- भारतीय ऋतु-विभागेन अद्य महाराष्ट्रस्य मध्यप्रदेशस्य च केभ्यश्चित् भागेभ्य: नारङ्गवार्णिकी संचेतना प्रसारिता।
- इंडियन् प्रीमियर् लीग् क्रिकेट स्पर्धा मालिकायाम् अद्य सायं जयपुरे सवाई मानसिंह क्रीडांगणे 'राजस्थान रॉयल्स्' दलं 'गुजरात टाइटंस्' दलेन स्पर्धते।

<u>प्रधानमन्त्री/वेल्लोरम्</u>

प्रधानमंत्री भारतीय-जनता-पार्टीति-दलस्य वरिष्ठ: नेता नरेन्द्र-मोदी अवदत् यत् भारतम् अद्य विश्वे शक्तिरूपेण समुदेति। अत्र हि तमिलनाडो: महती भूमिका अस्ति। वेल्लोरे अद्य एकस्यां नैर्वाचनिकजनसभायां श्रीमोदी उक्तवान् यत् तमिलनाडुराज्येन कठोरपरिश्रमद्वारा विनिर्माणक्षेत्रे भारतं पुरोगामि विधातुं अतितरां महत्वपूर्णा भूमिका निर्व्यूढा। ध्यानास्पदम् अस्ति यत् वेल्लोरत: न्यू जस्टिस पार्टीति दलस्य प्रत्याशी ए.सी. षण्मुगम् स्पर्धांगणे अस्ति। असौ भारतीयजनतापार्टीतिदलेन पूर्णत: समर्थित: अस्ति।

प्रधानमन्त्री/रामटेकम्

प्रधानमन्त्री अद्य सायं महाराष्ट्रस्य नागपुरजनपदे रामटेक-प्रखंडस्ये कन्हन-स्थले जनसभां संबोधयति, महायुति-प्रत्याशिनां कृते नैर्वाचनिकंप्रचारं च करिष्यति। रामटेक-लोकसभाक्षेत्रात् कांग्रेस्-दलस्य श्याम बर्वे स्पर्धांगणे अस्ति। तं प्रकाश-अंबेडकर -नेतृत्वयुतं वंचित-बहुजन-अघाडीति-दलं समर्थयति। अत्रान्तरे, बहुजनसमाजपार्टीति दलस्य अध्यक्षा मायावती उत्तरीय-नागपुरस्य इंदोरायां श्व: एकां जनसभां संबोधयिष्यति।

राष्ट्रपति/होम्योपैथी

राष्ट्रपति: द्रौपदी-मुर्मू: उक्तवती यत् होम्योपैथी-चिकित्सापद्धते: लोकप्रियताया: संवर्धनाय अनुसंधानं कार्यदक्षता च अतितरां महत्वपूर्णे स्त:। अपि च, होम्योपैथी इत्यस्या: प्रभावं प्रमाणयितुं चिकित्सानुसान्धानस्य वर्धनं परमम् आवश्यकम् अस्ति। राष्ट्रपति: अद्य नवदिल्ल्यां 'विश्व होम्योपैथी दिवसस्य' अवसरे दिनद्वयात्मिकां होम्योपैथी-संगोष्ठीं संबोधयति स्म।

राज्यसभा/सांसदा:

राज्यसभाया: दशभि: नवनिर्वाचितै: सदस्यै: शपथवचनं स्वीकृतम्। राज्यसभाया: सभापतिना जगदीप-धनखड़ेन नवदिल्ल्यां संसद्-भवने एते शपथं ग्राहिता:। नवनिर्वाचितेषु सदस्येषु भारतीयजनतापार्टीति-दलस्य मयंक भाई जयेदव नामक:, शिवसेना शिन्दे समूहस्य मिलिन्द: मुरली देवड़ा, कांग्रेस-दलीया रेणुका चौधरी, समाजवादी-पार्टीति दलस्य रामजी लाल सुमन: तृणमूल-कांग्रेस-दलीया सागरिका घोष: च अन्यतमा: सन्ति।

भाजपा/प्रत्याशिसूची

भारतीयजनतापार्टी-दलेन लोकसभा-निर्वाचनार्थं भूयोऽपि नव प्रत्याशिनां सूची प्रकाशिता। तदनुसारि, बलियात: राज्यसभासांसद नीरज-शेखर:, इलाहाबादत: नीरजत्रिपाठी, मैनपुरीसंसदीयक्षेत्रात् जयवीर-सिंह-ठाकुर:, चंडीगढ़ात् संजय-टंडन:, आसनसोल-लोकसभानात् एस्.एस्.अहलूवालिया च स्पर्धिस्यन्ते।

जम्मू-कश्मीर-ईद-उल-फित्र

ईद-उल-फित्र पर्व अद्य सम्पूर्णे जम्मू-कश्मीरे धार्मिक-श्रद्धया: हर्षोल्लासेन च सह आमान्यते। शुभोत्सव: सर्वशक्तिमन्तं ईश्वरं प्रति धन्यवादस्य प्रार्थनां कृत्वा पवित्रस्य रमजान-उपवास-मासस्य पराकाष्ठां ज्ञापयति। अद्य प्रात: कश्मीरोपत्यकायां विभिन्नेषु मस्जिदेषु ईद इत्यस्य नमाज़  इति प्रार्थना विधीयते।

प्रधानमन्त्री/आयरलैंड प्रधानमन्त्री

प्रधानमन्त्रिणा नरेन्द्रमोदिना आयरलैंडस्य नवनिर्वाचित: युव-प्रधानमन्त्री साइमन-हैरिस: वर्धापित:। एकस्मिन् सामाजिकान्तर्जालपटलीये सन्देशे श्रीमोदी प्रत्यपादयत् यत् स: 'भारत-आयरलैंड-द्विपाक्षिक-सहयोगं' भूय: अपि द्रढयितुं संभूय कार्यं अनुष्ठातुम् उत्सुक: अस्ति।

ऋतु-विभाग:

भारतीय ऋतु-विभागेन अद्य महाराष्ट्रस्य मध्यप्रदेशस्य च केभ्यश्चित् भागेभ्य: नारङ्गवार्णिकी संचेतना प्रसारिता। अस्य मासस्य त्रयोदश दिनांकं यावत् मध्यप्रदेशस्य, छत्तीसगढ़स्य, मध्य-महाराष्ट्रस्य च केषुचित् भागेषु एकान्तेषु वज्रपातेन विद्युत्प्रवाहेन पञ्चदश-कीलोमिटर प्रतिहोरा वेगेन च मध्यमवृष्टि: भविष्यति इति पूर्वानुमानितम्। दक्षिणभारते आगामिषु षट्-दिवसेषु तेलंगाना-केरल-पुद्दुचेरी-राज्येषु च एता: परिस्थितय: निरन्तरं भविष्यति। भारतस्य-ऋतु-विभागेन पूर्वानुमानितं यत् भारतस्य पूर्वी-क्षेत्रे केषुचित-भागेषु आगामी चतु: दिवसेषु प्राय: त्रय त: पञ्च डिग्रीमितं वर्धयिष्यति। अन्य सर्वेषु क्षेत्रेषु सामान्य ताप: भविष्यति।

क्रिकेट्

इंडियन् प्रीमियर् लीग् क्रिकेट्-स्पर्धा-मालिकायाम् अद्य जयपुरे सवाईमानसिंह-क्रीडांगणे 'राजस्थान रॉयल्स्' दलं 'गुजरात टाइटंस्' दलेन स्पर्धते। इयं स्पर्धा भारतीय-कालानुसारि सायं सार्धसप्तवादने आरप्स्यते। तत्रान्तरे, गतरात्रौ चंडीगढ़े महाराज-यादवीन्द्र-सिंह-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडांगणे आयोजिते लोमहर्षके द्वन्द्वे 'सनराइजर्स् हैदराबाद' दले 'पंजाब किंग्स्' दलं धावनांक-द्वयेन पराजितम्।

।। इति वार्ता: ।।